॥अथसन्निपातकलिकाप्रारंभः॥

श्रीगणेशायनमः॥ अथसन्निपातकलिकालिख्यते॥रोगग्रस्तशरीरशांतिकरणेविघ्नप्रमोदप्रभोभक्तिप्रयसुरोद्यसेवितपदोत्रैलोक्यचेष्टाविदो॥स्वस्मिंश्शांतिविधायिनोस्मितरुचाविद्योतितासामुरवोस्यातांवोजगतःसुखायसततंवेद्यादयंवंद्याश्चिनौ॥१॥अथस्निग्धोष्णरूक्षकटुमधुरसुरातापसेवाकषायैःस्वादुक्रोधातितीक्ष्णैःगुरुतरपिशितोहारसोहियज्ञीतैः॥ज्ञोकव्यायामचिंताग्रहगणवनितायंतसंगप्रभावैःप्रायःकुप्यंतुपुंसांमधुसमयशरद्दूषणेसन्निपाताः॥२॥संधिकश्चांतिकश्चेवरुग्राहःश्चित्तविभ्रमः॥सीतांगस्तंद्रिकःप्रोक्तकंठकुब्जश्चकर्णकः॥३॥विख्यातोभुग्ननेत्रश्चरक्तष्ठीवीप्रलापकः॥जिह्वकश्चेत्यभिन्यासःसन्निपातास्त्रयोदश॥४॥संधिकसप्तवर्षाणिचांतिकेदशवासराः॥रुग्दाहोविंशतिर्ज्ञेयास्त्रयोद्वाश्चित्तविभ्रमे॥५॥शीतांगेपक्षमेकंतुतंद्रिकेपंचविंशति॥विज्ञेयावोंसाश्चैवकंठकुब्जेत्रयोदश॥६॥कर्णकेचत्रयोमासाभुग्ननेत्रेदिनाष्टकं॥रक्तष्ठीवीदशाहानिचतुर्दशप्रलापके॥७॥जिह्वकेषोडशाहानि[illegible]न्यासेपक्षसंक्षया॥परमायुरिदंप्रोक्तंम्रियतेतक्षणादपि॥८॥पूर्वरूपस्तशूलसंभवंशोफवातबहुवेदनान्वितं॥[illegible]लहानिजागरंसन्निपातमितिसंधिकंविदुः॥९॥संधिस्थेहितमस्थिलंघनविधिःस्वेदोपहानादिकंउ[illegible]र्मसमग्रमेवविहितंकूर्याद्यवागूरसं॥मूलीपंचककल्ककल्पितमिदंसन्मागधीमीश्रितंकोलस्यनरसेनसैंधवयुतंपेयंचविश्वौषधं॥१०॥रास्नागुडूचीशठीरुद्रदारुसुराह्वविश्वात्रिफलावरिभिः॥क्वाथंपिबेद्गुग्गुलसंप्रयुक्तंसमस्तिसंधिग्रहसन्निपाते॥११॥अमृतरुबुकविश्वासुरतरुरास्नाहरीतकीक्वाथः॥

सकलसमीरणरोगान्प्रातःपीतोहरेत्सद्यः॥१२॥ग्रंथिकसुरतरुपथाकृतमालशिवाटरूषकैर्विहितः॥एरंडतैलसहितःक्वाथोहन्यान्मरुद्रोगं॥१३॥रास्नाभुंटीगुडूचिसहचरजलदाभीरुपथ्यासुराह्वैस्सिक्ताकर्षूरवासानिलरिपुसहितैःपंचमूलद्वयेन॥एभिर्द्व्येकषायैस्त्वरितमुपहरेत्पीतमात्रप्रभातमन्यास्तेभांत्रद्विज्वरपीठककटीसंधिसर्वांगपीडां॥१४॥निर्गुंडीपुरसहितःसिद्धार्थकनिबपत्रसंयुक्तः॥सर्जरसेनसमेतोधूपवरःसंधिगंहरति॥१५॥निर्गुंडीपिचुमंदकुदविजयाकार्पाससिद्धार्थकैः॥षड्ग्रथितगरामरुभिर्मीर्तुमूलान्वितैः॥चंडाधावकरुद्रमाल्यसहितैर्मध्वासवैर्मर्दितैः॥धूपायंग्रहसंन्नि[illegible]डांविनिक्षीक्षणात्॥१६॥इतिसंधिकसंन्निपातप्रथमः॥१॥ सप्तावर्षाधिकः॥ अथांतकः॥दाहंकरोतिपरितापनमातनोतिमाहेददातितुदतीतिशिरःप्रकंपं॥हिक्कांकरोतिकसनेचसमाजुहोतिजानीहितंविबुधवर्जितमंतकस्थं॥१॥अंतकश्चायमसाध्यः॥ दिनदशावधिकः॥अथरुग्दाहकः॥प्रलापपरितापनप्रबलमोहमांद्यभ्रमःपरिभ्रमणवेदनाव्यथितकंठमन्याहनुः॥निरंतरतृषाकरःश्वसनशूलसव्याकुलःसकलतरसाधनोभवतिहंतिरुग्दाहकः॥१॥जलधरमलयजनागरपर्पटकोशीरबालुकैःकथितं॥यःपीबतिपयःसुशीतंशाम्यतिरुग्दाहकंतस्य॥२॥अभयापर्पटमुस्ताकटुकाशाम्याकगोस्तनीक्वाथः॥पीतःकरोतिनाशंरुग्दाहरुजोनसंदेहः॥३॥ब्राह्मिद्राक्षाजलधरवचाभीरुशाम्याकतिक्तापथ्याधात्रीकलितरुमहानिंबकोशातकीभिः॥भूनिं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

बाध्योभवतिसहितंपंचमूलद्वयेनपीतः क्वाथःसकलपवनव्याधिरुग्राहहंता॥४॥बदरीपल्लवलेपःश्रीखंडारिष्टफेनसंयुक्तः॥
दातव्यःपादतलेयोरुग्राहसंन्निपातदोषघ्नः॥५॥अगरुघनसारसिहूककरूरुहनलनीरचंदनैर्युक्तः॥रुग्राहसन्निपातंनिहं नी
तिमधुमिश्रितोधूपः॥६॥इतिरुग्राहसन्निपातः॥ अथदिनविंशतिसंख्याकः२०॥अथचित्तविभ्रमः॥यदिकथमपिपुंसांजा
यतेतापपीडाभ्रममदपरितापोमोहवैकल्यभावः॥विकटनयनवासोगीतनृत्यप्रलापाविदधतितमसाध्यंकेपिचित्तभ्र
मारव्यं॥१॥पथ्यापर्पटकटुकामृद्वीकादारुजलदभूनिंबा॥ज्ञाम्याकपटोलज्ञिवाक्वाथश्चित्तविभ्रमंहंति॥२॥हरीतकी
पर्पटहारहुराज्ञांबूकपुष्पीकटुकापयोभिः॥ज्ञाम्याकमेधाह्वयभारतीभिश्चित्तभ्रमंहंतिसृतःकषायः॥३॥मधुनस्व
ज्ञाल्मलीरसछागवनतरूपथामुरागरूभिः॥मलयजसहितैरेतैःक्वाथश्चित्तभ्रमंहंति॥४॥इतिचित्तभ्रमसन्निपातः॥
चतुर्थो॥वर्षत्रयवधिःकः॥ अथज्ञीतांगः॥हिमज्ञिज्ञीरज्ञारीशेवेपथुःश्वासहिक्काज्ञिथिलितसकलांगः खिन्ननादानु
तापः॥क्रमशुदवथुकासछर्द्यतीसारयुक्तस्त्वरितमरणज्ञांसीज्ञीतगात्रत्रभावात्॥१॥मातुलुंगादिभूनिंब
वदारुच॥दज्ञामूलाजमोदवशुंठीज्ञीतांगनाज्ञने॥२॥श्रीवेष्टफलसंभूतभस्मभागादष्टकंशुभं॥मरिचस्यचचतु
सस्येकोविषस्यच॥सूक्ष्मचूर्णंततःकृत्वामर्दयंतियत्नतः॥असाध्येपिहिज्ञीतांगेस्वेदयातिहिनिश्चितं॥४॥चूर्णंच
णकभृष्टोहिंगुभृष्टभृंगीसमंतथा॥एकंकोलप्रकंचूर्णंस्वेदोयातिहिनिश्चितं॥५॥इतिज्ञीतांगः॥संन्निपातअसा
ध्यःपंचमः॥पक्षैकमर्यादः॥अथतंद्रिकः॥प्रभूततंद्रार्तिर्ज्वरकफपिपासाकुलतरुर्भवेच्छामाज्जिह्वापृथुलकठि
नाकंटकरुता॥अतीसारःश्वासःक्रमशुपरितापःक्रतिरुजोभ्रूशंकंठेकंडुर्भवतिकिलनिद्रानयेनयोः॥१॥भागहि २

=४पूरितास्य

=४कष्टसाध्यःस्वयंमतः=४। =केतकी=७।

पुष्करपथ्यानिदिग्धिकानागरमृताक्वाथः॥अपनयतितंद्रिकगदंनिःसंधेयंहंआकूपीतः॥२॥स्रक्षामनःज्ञिलाताभ्यांयुक्ता=१
लेमंजनंमेवहितंतद्रिकगदे॥अमृतात्रिकटुकपटोलीक्वाथोवाज्ञास्यतेप्येषु॥३॥कुष्ठगवाक्षीनागरनिर्ज्ञाद्वयम
रिचवचाकणायुक्तः॥वस्त्रसलिलेनपिष्टस्तंद्रिकहंताभवेन्नस्यः॥४॥ज्वरेप्रथमसुप्तेचक्षुभ्यंनैवदृश्यते॥ =पश्यति
तंद्रिकःसन्निसौकष्टसाध्योभवेत्ततः॥इतितंद्रिकसन्निपातःषष्ठः॥दिनपंचविंशतिसंख्यामितः॥ अथकं
ठकुब्जः॥शिरोर्तिकंठग्रहदाहमोहकंपज्वरोरुकूजसमीरणार्तिः॥हनुग्रहस्तापविलापमूर्छास्याकंठकुब्जःकिल ×पाठो
कष्टसाध्यः॥१॥त्रिकटुककलिंगकटुकाहरीतकीघनविभीतकामलकैः॥ध्वंसयतिकंठकुब्जंवृषरजनीद्व
क्वाथः॥२॥शृंगीवत्सकचेतकीघनज्ञटीभुनिंबभार्गीनिर्ज्ञास्तिक्तापुष्करचित्रकैःरतिविज्ञाशुंठीकणाव्योषधात्री
दारुविभीतकैःसमरिचैर्व्याधीविषान्मिश्रितैर्गंडंकंठतिक्रंठकुब्जमचिरात्कोष्ठःकषायःकृतः॥३॥अपनयतिकं
ठकुब्जंरुक्षापामार्गबीजनस्येन॥अथहंतिसलिलसहितंत्रिकटुकंविनीनश्यः॥४॥इतिकंठकुब्जःसंन्निपातसप्तम
मः७त्रयोदज्ञदिनावधिसंख्याकः॥१२॥अथकर्णकः॥प्रलापःप्रलापःश्रुतिर्व्हासयहोगव्याधाश्वासकंपप्रसेक
प्रभावः॥ज्वरोतापकर्णेतिगंथिज्ञोफंबुधाकर्णकंकष्टसाध्यंवदंति॥१॥ज्वरस्यचादौज्वरमध्यतोवाज्वरांतकोवा
श्रुतिमूलज्ञोफः॥क्रमादसाध्यःखलुरुक्षसाध्यःसुखेनसाध्योमुनिभिःप्रदीष्टः॥२॥प्रलापमूर्छास्मृतिवि

=७पीतः=

=४कष्टसाध्यःस्वयंमतः=४। =केतकी=७।

=४बस्तसुत्रपिष्ट
=यं४
=शूल५

भ्रमंचशामलजिह्वाव्रणकर्णमूले॥स्वल्पंचशूलंबलदर्शनंचहिध्मातुरंकर्णककष्टसाध्यं॥३॥मरिचवचामागधि
कामधुकसारैःससैंधवैरभिः॥पूर्णःकर्णकदोषंनिहंतिकोष्ठाबुनाअगेपीतः॥४॥रक्तस्रावंजलौकाभिर्धृतपानंच
ज्ञास्यते॥कर्णकगंथिनाज्ञार्थंमायुर्वेदविज्ञारदैः॥५॥शास्नाबृहतिपथ्याघनकटुकाव्योषपुष्करास्नवचा॥शृंगी
वरीचभार्गिकाथोयंकर्णिकंहंति॥६॥मरीचदशमूलकटुकाफलत्रयकणामहौषधैर्मिश्रः॥भूनिंबयुतःपीतः
कर्णकहंताभवेत्क्वाथः॥७॥इंगुदीनिशाविशालासैंधवसरदारुकुष्ठरविदुग्धैः॥दत्तःक्रमेणलेपोहरतिमहांक
र्णकगंथिं॥८॥दशशातकरदुग्धापुष्करंस्नुक्समेतं॥दहनगुडनिकुंभाकुष्ठकासीरयुक्तं॥अपनयतिवि
कीर्णलेपनंसप्तरात्रात्क्ष्यथुहरणशक्तिकर्णकगंथिनाशि॥९॥अर्शिशिरजलयुक्तंनावनंकर्णकार्तीजन
यतिसुखसंधिंघ्राणरंध्रप्रवेशात्॥परमलवणरूक्षाचूर्णमिश्रंप्रभातेसकलमुनिभिरुक्तंव्या[illegible]
सकारि॥१०॥भल्लातकंगुडंकुष्ठंस्वर्जिकाक्षारचित्रकैः॥कासीसमर्कदुग्धेनलेपःकर्णकनाशनः॥११॥
क्ष्यथुलवणसस्यंकर्णकगंथिमतत्॥शमयतिसुखलेपोध्वांतवसूर्यरश्मिः॥१२॥इतिकर्णकसंन्निपा
तोष्टमः॥८॥मासत्रयमर्यादा॥ अथभग्नदृक्॥ज्वरबलोपचयःस्मृतिशून्यताश्वसनभुग्नविलोचन
मोहितः॥प्रलपनश्रमकंपशीफवान्॥सजतिजीवितमाशुसभग्नदृक्॥१॥दार्व्यंबुदंतिक्तफलत्रिकंच

क्षुद्रापटोलीरजनीसनिंबा॥क्वाथंविदध्याज्वरसन्निपातेनिश्चेतनेपुंसीनिबोधनार्थं॥२॥रूक्षापटोल
कटुकाघननिंबसुराह्वधावनीसहितः॥किटभ्रहंतिहरितंमोहितपित्तज्वरमुग्रसन्निपातोर्थं॥३॥भुनिं
बरूक्षेमधुनाविमर्दितेलोहःसतोयंप्रसतोप्रशास्यते॥मधुकसारस्यसवंकणान्वितंनस्यंचगोमूत्रक
णोषणांजनं॥४॥भूनिबमाक्षिककणासहितंचकुर्याल्लेहंकणाषणरसोनकराजिभिश्च॥नेत्रांजनंचत्रिवणोत्त
मपिप्पलीभ्योनस्यंवचामरिचहिंगुमधूकसारैः॥५॥मरिचतुरगगंधामागधीसिंधूजातंत्रिसुनमधुकसार[illegible]
ग्रगंधाद्रवाभ्यां॥छगलकजलपिष्टंनस्यमेतत्प्रदेयंप्रशामयतिरुतंनेत्रयोरंजनंच॥६॥निर्गु[illegible]
मंदकुष्ठविजयाकर्पाससिद्धार्थकैः॥षड्ग्रंथितगरामरेंद्रतरुभिर्मार्त्तंडमूलान्वितैः॥सत्रिफलाक्षारंकरं
जमाल्यसहितैर्मध्वोज्यसंमर्दितैर्धूपोयंग्रहसन्निपातजनितांपिडापिनद्याद्भुतां॥७॥मरिचतुरग
गंधामागधीसिंधुजातित्रिसुनमधुकसारश्चोग्रगंधाद्रिकाभ्यां॥युगलकजलपिष्टःसंयुतःशास्त्रविद्भिः
सपदिभवतिनस्याभग्ननेत्रप्रमाथी॥८॥यष्टिकपोटलकटुकाघननिंबसुराह्वधावन्यःअपहरति
मोहपित्तंज्वरमुग्रंसन्निपातोल्वणं॥९॥इतिभग्ननेत्रसंन्निपातानवमः९॥दिनाष्टकसंख्याकः॥ ॥
अथरक्तष्ठिवी॥रक्तष्ठिवीज्वरवमीतृषामोहशूलातिसारोहिक्काध्मानंवमथुश्वासस

ज्ञाप्रणाज्ञा॥ श्यामारक्ताधिकतरतनोर्मंडलोत्थानरूपोरक्तष्ठिवीनीगदितद्रवप्राणहर्त्रीप्रसिद्धः॥१॥ पर्पटं धन्वयवासकयास्मा
भूतृणकेः कटुकाफलनीभ्यां॥ शर्करयासहितोपिकषायः लोहिमास्यगतंखलुहंति॥२॥ जलदाह्वयपद्मकपर्पटकैर्मल
योद्भवजातिवरीमधुकैः॥ मधुनिंबजलदारुचंदनैः क्वथितंमुखरक्तहरसलिलं॥३॥ कर्णाक्षिमुखनाज्ञायरक्तस्रावंक
रोतियः॥ रक्तष्ठिवीकचिसाध्यःसंन्निपातोभवेज्जने॥ नस्यंदाडिमपुष्पोत्थरसोदूर्वारसस्तथा॥ आम्रास्थिजःपलां
डोवीनासिकारक्तजित्॥५॥ इतिरक्तष्ठिवीसन्निपातोदशमः॥१०॥ दिनदशासंख्याकः॥ अथप्रलापकः॥ कं
पप्रलापपरितापनज्ञंरवपीडाज्ञोकप्रलापल्लवमानपरैर्वचितः॥ अज्ञाप्रणाज्ञाविकल्पप्रचुरप्रवादीक्षिप्रंप्र
यातिपितृपादपदंप्रलापी॥१॥ उत्तिष्ठतेबलात्कारंकृत्वाब्रूतेयदृच्छया॥ यामिन्यांवदतेत्यर्थंसतै[redacted]षि
षग्वरैः॥२॥ तगरतुरगगंधापर्पटैःज्ञंरवपुष्पीत्रिदज्ञाविठपतिक्ताभारतीभूतकेज्ञी॥ जलधरकृतम[redacted]
केतकीगोस्तनीभ्यांसहहरतिकषायःपीतमात्रःप्रलापं॥३॥ जलधरदज्ञामूलंवारिशुंठीसमेतंमत्स्यजघ
नसारंपर्पटंवासकंच॥ समधरणधृतांज्ञःकाथज्ञोषंचकार्यप्रज्ञामयतिनितांतंपीतमात्रःप्रलापं॥४॥ इति
प्रलापकसंन्निपातएकादज्ञः॥११॥ दिनचतुर्दज्ञसंख्याकः॥१४॥ अथजिह्वकः॥ श्वासकासपरितापविह्वलः
कठिणकंटकचितातिजिह्वकः॥ बधिरमूकबलहानिरक्षणोभवतिकष्टतरसाध्यजिह्वकः॥१॥ सिंहीनागर

पुष्करैः सकटुकैरास्नागडूचियुतैर्भाग्ज्ञिकर्कटश्रृंगिकाज्ञाठिसमेदुस्पर्शवासाघनैः॥ पीतंजिह्वकहारीवारीभवति
ब्राह्मीवचामिश्रितेयुक्तंवैद्यवरेणवेद्यमुनिभिर्भूनिंबमिश्रीकृतं॥२॥ सुरतरुकटुनिंबैरक्षपथ्यापटोलीरजनि
युगलविश्वासिंहिकापुष्करैः॥ सलिलधरगडूचीसंयुतैः सिद्धमेभिःप्रज्ञामयतिकषायोजिह्वकंकष्टसाध्यं
॥३॥ तीक्ष्णद्रव्यैःसलवणैर्मातुलुंगरसप्लुतैः॥ जिह्वायांभृद्विलेपःकटुतिक्तनसंयुतः॥४॥ द्रव्यमेकंतुजि
ह्वायामुत्पादयतिकंटकान्॥ जिह्वकःसंन्निपातोयंकष्टसाध्यःप्रकीर्तितः॥५॥ इतिजिह्वकसन्निपातो[redacted]
शः॥१२॥ दिनषोडज्ञमिति॥१६॥ अथाभिन्यासः॥ दोषत्रयस्निग्धमुखैरवलनिद्रावैकल्य[redacted]
नष्टवाग्मी॥ बलप्रणाज्ञोश्वसनादिविद्धोभिन्यासविध्वंसनमृत्युकल्पः॥१॥ रामठनागरसहितंभृंगर
सनलक्षियःपुमान्प्रातः॥ अथकटुतिक्तसमेतंयःसभवतिमुखबोधनंतस्य॥२॥ मरिचलवणरुक्षाभूतके
शीमधुकैःसमस्तमिहमचित्वाकोष्णनीरेणनस्यः॥ प्रगटयतिविकीर्णश्चाक्ष्णिवीक्षतुर्भिःसकलकरणबोधं
बिंदुभिर्दीयमानः॥३॥ लशुनमरिचरुक्षामाणिमंथोग्रगंधाशुकतरुफलबीजैराजगोमूत्रपिष्टैः॥ कफपवन
विकारेरक्तपित्तप्रभेदेनिगदितश्वनस्यंनेत्रयोरंजनंच॥४॥ संज्ञायस्यनजायतेचरणयोर्दंदह्यसादह्यतेभा
लेलोहशिलाकयासतिलतेसर्वक्रियाकर्मणि॥५॥ श्रृंगीधन्वयवासपुष्करजटाभार्ग्ज्ञीसिंहिकाक्वाथःपा

नविधानतःकफहरोभिन्यासविध्वंसकः॥६॥त्रायंतिदशामूलपुष्करजरावातारिभिः कारवीभागइविश्वभृताटरूष
कशार्गीगोमूत्रसंयोजितः॥शृंगीयासपुनर्नवाभिरचिरात्कोष्ठःकषायोहरेत्सोभिन्यासगदंकफज्वरयुतंनिःसंज्ञ
यंपानतः॥७॥मज्जिष्ठाशिरिबिल्वमूलकशठीसुंठिकरंजानिशात्रायंतिवृहतिवृषोषणकणाक्काथंचपीयते॥यः
प्रातःप्रणिधायलक्षितगदंवैद्योत्तमःसन्निधौनस्याभ्युत्रशमंव्रजंतिसततंसर्वेगलव्याधयः॥८॥सुरभिसलि
लयुक्तःसिंहिकाश्रीफलाभ्यांपरमलवणपाठानिंबपाषाणभेदैः॥पवनरिपुजयाभिःसंयुतैःक्काथएवप्रतिदि
नमतिपीतोहंत्यभिन्यासमुग्रं॥९॥भार्गइभूनिंबनिंबैर्धनकटुकवचाव्योषवासाविशालारास्नानंतापटोली
सुरतरुमजनिंपाठात्रिवृत्कीभिः॥ब्राह्मीदार्वीगुडूचीत्रिवृदतिविषापौष्करंत्रायमाणोपाठाव्याघ्रीक
लिंगैःत्रिफलशठियुतैःकल्पितस्तुल्यभागैः॥क्काथोद्वात्रिंशनामावलितदशकानसन्निपातान्निहं
लश्वासातिहिक्काश्वसनगुदरुजाध्मानविध्वंसदक्षः॥१०॥मन्यास्तंभास्त्रवातात्गलगदमरुतःसर्वसंधि
ग्रहाश्चमातंगोयंनिहन्यात्सगरिपुरधिकंरोगजालंयथैव॥११॥केसरंमातुलुंगस्यमधुसैंधवसंयुतं॥जिह्वा
तालुगलौष्ठेषुमर्दयेत्कोमूर्धिप्रदापयेत्॥१२॥करवीरस्यपुष्पाणिचंदनंसारिवाशिलाः तृष्णायांक्षीरसोलेपक्षारना
लेनपेषितः॥१३॥सैंधवंश्वेतमरिचंसर्षपाःकृष्णमेवचवस्त्रमुत्रेणसंपिष्टंनस्यतंद्रीनिवारणं॥१४॥मधुकसारसिं
धूत्थवचोषणकणाःसमाः॥संज्ञाप्रबोधनानस्यःसन्निपातकफा[illegible]त्मके॥१५॥तुरंगलालासहितामृ

नःशिलानिहंतितंद्रासकलोजनेन॥तांबूलपत्राणिहरीतकीचसकुष्ठिताश्चित्तविकारहंत्री॥१६॥कस्तूरीमरिचंवा
जीलालाचमधुनांजनं॥तंद्रीनिवारयत्याशुव्योषंश्रमतस्तथा॥१७॥त्रिकटुकंपलांडोश्चचूर्णंहंतिश्रमादनैः॥अंग
दोषोद्भवंस्वेदंकौलत्थंसवचंतथा॥किरातकटुकापथ्याजरणाकट्फलंवचः॥पुष्करंनत्रिदोषेशेस्वेदनीतेचशस्यते॥
१९॥आर्द्रकस्यरसोपेतंसैंधवंचकटुत्रिकं॥आकंठेधारयेदास्यनिष्ठीवेचपुनःपुनः॥२०॥तेनश्लिष्यतेश्लेष्मामन्यास
र्थशिरोगतात्॥लीनोप्यास्रष्यतेशुष्कोलाघवंचास्यजायते॥२१॥शिरीषबीजलशुनैःपिप्पलीसैंधवंवचा॥[illegible]नः
शिलासमरिचावस्तमूत्रेणचांजनं॥२२॥कृतेक्रियाविधाने[illegible]पिसंज्ञायस्यनजायते॥चिकित्सकस्तेन[illegible]छ
येत्सान्निपातिनं॥२३॥तोलभेद्यदिचेतन्यंतप्तलोहशलाकया॥पादयोश्चतलेपिप्पलीटंकमूलरंध्रयोः॥२४॥
तदासेकःप्रदातव्योद्यायुर्वेदविचक्षणैः॥ततोरोगीसन्निपातान्मुच्यतेनात्रसंशयः॥२५॥इतिअभिन्यासःस
न्निपातस्त्रयोदशमः॥१३॥पक्षसंख्यामितः॥१५॥इतिश्रीसंन्निपातकलिकासमाप्ता॥शुभंभवतु॥१॥
शाके१७८८दुंदुभिनामसंवछरेजेष्ठवद्य३०गुरौसेरसमाप्तः॥अयंपुस्तकंव्यंकटेशबाबुरायदेवस्थळीय
स्य॥येकांदरग्रंथसंख्या॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिसंन्निपातकलिकासमाप्तः॥

DR. BHAU DAJI LAD MUSEUM
MEMORIAL